संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - ३
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

श्रीवासुदेवत्रिपाठिविरचितः

# प्रायश्चित्तविलोचनः

सम्पादकः
सन्तोषकुमारपण्डा

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

# भूमिका

विदितमिदं समेषां यत् धर्मशास्त्रसाहित्यमतीव सुविशालं प्राचीनतमञ्च शास्त्रम्। वैदिककालानन्तरं सूत्रकाले साहित्यमिदं प्रादुरभूत्; यस्योत्पत्तिर्वेदाङ्गादेवाम्नायते। षट्सु वेदाङ्गेषु कल्पादेव धर्मशास्त्रस्य सृष्टिरिति सर्वैः स्वीक्रियते। कल्पसूत्रस्यावान्तरभेदरूपं धर्मसूत्रं धर्मशास्त्रमेव विषयीकरोति। "श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिरिति"[१] मनुवचनात् स्मृतेर्धर्मशास्त्रत्वेऽपि धर्मसूत्रस्य धर्मशास्त्रत्वं नास्वीकर्तुं शक्यते। तत्र केवलमुभयोः शैलीगतभेदो विद्यते। मन्वादिप्रणीता ग्रन्थाः स्मृतिसाहित्ये गौतमादि-धर्मसूत्रग्रन्थाः सूत्रसाहित्ये चान्तर्भवन्ति। स्मृतिसाहित्य-सूत्रसाहित्ययोर्मध्ये मन्वादिप्रणीतस्य स्मृतिसाहित्यस्य प्राचीनत्वमितिहासकारैः[२] सयुक्तिकं प्रत्यपादि। उभयोः साहित्ययोरनन्तरं निबन्धसाहित्यं सृष्टम्।

उत्कले धर्मशास्त्रनिबन्धग्रन्थानां रचना ख्रीष्टीय - एकादशशतकादेव प्रारब्धा। उत्कलीयधर्मशास्त्रपरम्परायां शङ्खलिखितस्मृतेरनन्तरं शतानन्दसंग्रहाख्यो धर्मशास्त्र-निबन्धग्रन्थो विरचितः। तयोर्मध्ये सूत्रसाहित्यस्य रचना उत्कलेऽस्मिन् दृश्यते।

विभिन्नशास्त्रमाश्रित्यात्र विभिन्ना निबन्धग्रन्था प्रादुरभूवन्। तेषु धर्मशास्त्रस्य विभिन्नविषयानधिकृत्योत्कलीयनिबन्धारो निबन्धान् व्यरचयन्। केवलं प्रायश्चित्त-विषयमधिकृत्यात्रापि नैके निबन्धग्रन्थाः सन्ति। तेषु ग्रन्थेषु केचन लुप्ताः, केचन त्रुटिताः, केचन कीटदष्टा अपि विद्यन्ते। राज्यसर्वकारस्य तत्त्वावधानेन राज्यसंग्रहालयपक्षतः यदा मातृकाणां संग्रहणं संरक्षणं च सञ्जातं तदा एते निबन्धग्रन्था अस्माकं दृग्गोचरीभूता अभूवन्। सौभाग्यतः श्रीमतो वासुदेवत्रिपाठिनः प्रायश्चित्तविलोचनो मया उत्कलराज्य-संग्रहालयात् लब्धः। ग्रन्थस्यास्य प्रतिलिपिद्वयं तालपत्रमातृकारूपेण मया प्राप्तम्। एका प्रतिः राज्यसंग्रहालयादपरा च कटकमण्डलान्तर्गतचाटरानामधेयाद् ग्रामात्। प्रतिरियं द्विपञ्चाशदधिकैकशतपत्रविशिष्टमासीत्। अस्या मातृकाया अक्षराणि सुन्दराणि भवन्ति। अतो मातृकेयं मया 'क' पुस्तकरूपेण निर्वाचिता। अस्या मातृकाया दैर्घ्यं सप्तदश इञ्चपरिमितं प्रस्थश्च पादन्यून-इञ्चपरिमितः (0.75")। प्रतिपत्रञ्च पङ्क्तिचतुष्टयं विद्यते। मध्ये मध्येऽक्षराणि कीटदष्टत्वात् त्रुटितानि भवन्ति। अपरा प्रतिर्या मया राज्यसंग्रहालयात्प्राप्ता, तस्याः क्रमाङ्कः डी.एच्. ५०३। मातृकेयं मया 'ख' पुस्तकरूपेण

---

१. मनु. २-१०

२. History of Dharmashastra Vo. I-P-I

# विषयानुक्रमणिका


| विषयाः | | पृष्ठासंख्या |
|---|---|---|
| शुभ सन्देश | - | v |
| आमुखम् | - | vii |
| भूमिका | - | ix |
| **प्रथमप्रकरणम्** | - | 1 |
| मङ्गलाचरणम् | - | 1 |
| अथ प्रायश्चित्तलक्षणम् | - | 1 |
| प्रायश्चित्ताकरणे दोषः | - | 2 |
| पापवतां प्रायश्चित्तोपदेशे फलम् | - | 4 |
| धर्मशास्त्रमविज्ञाय प्रायश्चित्तोपदेशे दोषः | - | 4 |
| अनुग्रहादौ प्रायश्चित्तम् | - | 6 |
| बालवृद्धस्त्रीरोगिणां कृते प्रायश्चित्तम् | - | 7 |
| अथोपपातकादि | - | 11 |
| अथानुपातकम् | - | 13 |
| अथ महापातकम् | - | 13 |
| अथातिपातकम् | - | 15 |
| अथ धेनुमूल्यनिरूपणम् | - | 15 |
| अथ प्रायश्चित्तपूर्वाहकृत्यम् | - | 16 |
| **अथ द्वितीयप्रकरणम्** | - | 20 |
| अथ व्रतनिर्णयः | - | 20 |
| ब्राह्मणस्वामिकचतुर्हायण्यादिकगोसम्बन्धिज्ञानकृतसाक्षाद्वधव्रतम् | | 21 |
| अथ क्षत्रियस्वामिकचतुर्हायण्यादिगवीज्ञानकृतसाक्षात् वध-प्रायश्चित्तम् | | 24 |
| अथ वैश्यसम्बन्धिगोवधप्रायश्चित्तम् | - | 25 |
| अथ शूद्रस्वामिकगोवधप्रायश्चित्तम् | - | 26 |
| गर्भिण्यादिवधे प्रायश्चित्तम् | - | 28 |
| अथैकहायन्यादिवधे प्रायश्चित्ताम् | - | 30 |
| अथ स्वयं पतनादि प्राप्तमरणावस्थोन्नतादिगोवधे प्रायश्चित्तम् | | 32 |
| अथ ज्ञानतो वैश्यस्वामिक-एकहायन्यादिधेनुवधे धेनुनिर्णयः | | 32 |
| अथ ज्ञानतो शूद्रस्वामिकैकहायन्यादिधेनुवधे धेनुनिर्णयः | | 32 |

[50]स्त्रीणां रोगिणां च अर्द्धप्रायश्चित्तमिति । एवं शूद्राणामप्यर्द्धम् । तत्र विशेषं वक्ष्याम इति । स्मृति:-

[51]असंस्कृतो निरुत्साहो रोगी नवतिजीवक: ।
यथाशक्ति प्रकुर्वीत व्रतं ह्येषु न लुप्यते ।। इति ।।

अथ ज्ञानाज्ञानकृतं पापं यत्र यदुद्दिष्टं तत्र तदेव कर्त्तव्यम् । यतोऽत्राज्ञानकृत एवोद्दिष्टं न पुनर्ज्ञानकृते, तत्र तद्द्विगुणं प्रायश्चित्तं कर्त्तव्यम् । यत्र च ज्ञानकृत एवोद्दिष्टं न तु अज्ञानकृते तत्र तदर्द्धं प्रायश्चित्तं बोध्यम् ।

"स्यात्त्वकामकृते यत्तु द्विगुणं बुद्धिपूर्वके ।।"

इति [52]अंगिरोवचनात् ।

कृच्छ्रांस्तु चतुर: कुर्यात् गोवधे बुद्धिपूर्वके ।
अमत्या तु द्वयं कुर्यात्तदर्द्धं बालवृद्धयो: ।। इति [53]विश्वामित्रात् ।

एवमेकत्र निर्णीत: शास्त्रार्थोऽन्यत्र बाधकं विना प्रवर्त्तते इति न्यायानुसरणात्सर्वत्रैव व्यवस्थेयम् । तदत्र ज्ञानाज्ञानकृत्त्वं निरूप्यते । गोवधस्य बुद्धिपूर्वकत्त्वं च तदा भवति यदि गां ज्ञात्वा एतां हन्मि इति इच्छया हन्ति, तदा कामनाद्वारैव ज्ञानस्य प्रवृत्त्यंगत्वात्तदभावे त्वबुद्धिपूर्वकत्त्वम् । अतएव प्रवृत्त्यंगज्ञानस्य कामनाव्यभिचारादेव उक्तविश्वामित्रवचने ज्ञानाज्ञानाभ्यां द्वैविध्यमत्र कामनाऽकामनाभ्यामित्युक्तम् । यथा [54]बृहस्पत्युक्तौ–

कामाकामकृते त्वेवं महापापं द्विधा मतम् ।
पुरुषापेक्षया चैव निष्कृतिर्द्विविधा स्मृता ।।

इत्थं च गवयादिभ्रमेण यत्र गोवधस्तत्र गोवधस्य न ज्ञानकृतत्त्वं गोत्वेनाज्ञानात् । यदि च गोत्वेन जानन्नपि चान्यथाक्षिप्तनाराचादिना हन्ति, तदापि न ज्ञानकृतत्त्वं तद्विषयकत्वेन

---

50. च्यवनवचनत्वेन प्रायश्चित्तविवेके यथा -
बालवृद्धस्त्रीणामर्द्धं प्रायश्चित्तम् । आषोडशाद् बाला: ।सप्तत्यूर्द्ध्वा: स्थविरा: ।"- प्रा.वि.पृ.34

51. लघुहारीतवचनत्वेन प्रायश्चित्तविवेके प्राप्यते - प्रा.वि.पृ

52. मुद्रितांगिरस्स्मृतौ नास्ति । परन्तु यमवचनत्वेन प्रायश्चित्तविवेके समुपलभ्यते । प्रा.वि.पृ.178

53. विश्वामित्रवचनत्वेन प्रा.वि.पृ.233

54. प्रकाशितबृहस्पतिस्मृतौ नास्ति परन्तु बृहस्पतिवचनत्वेन प्रायश्चित्तविवेके प्राप्यते - प्रा वि.पृ.28

















**Rashtriya Sanskrit Sansthan**

56-57, Institutional Area, Janakpuri,
New Delhi 110 058